**॥ श्री स्वामी सामर्थ ॥**

---

# ॥ याज्ञवल्क्य कृत शिव रक्षा स्तोत्रम् ॥

---

विनियोग:

ॐ अस्य श्रीशिवरक्षास्तोत्रमन्त्रस्य याज्ञवल्क्य ऋषि:,
श्रीसदाशिवो देवता,
अनुष्टुप् छन्द:,
श्रीसदाशिवप्रीत्यर्थं शिवरक्षास्तोत्रजपे विनियोग: ।

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्य साधनम् ।।१।।

गौरीविनायकोपेतं पंचवक्त्रं त्रिनेत्रकम् ।
शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नर: ।।२।।

गंगाधर: शिर: पातु भालमर्धेन्दुशेखर: ।
नयने मदनध्वंसी कर्णौ सर्पविभूषण: ।।३।।

घ्राणं पातु पुरारातिर्मुखं पातु जगत्पति:।
जिह्वां वागीश्वर: पातु कन्धरां शितिकन्धर:।।४।।

श्रीकण्ठ: पातु मे कण्ठं स्कन्धौ विश्वधुरन्धर:।
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक् ।।६।।

हृदयं शंकर: पातु जठरं गिरिजापति: ।
नाभिं मृत्युंजय: पातु कटी व्याघ्राजिनाम्बर: ।।७।।

सक्थिनी पातु दीनार्तशरणागतवत्सल: ।
ऊरू महेश्वर: पातु जानुनी जगदीश्वर: ।।७।।

जंघे पातु जगत्कर्ता गुल्फौ पातु गणाधिप: ।
चरणौ करुणासिन्धु: सर्वांगानि सदाशिव: ।।८।।

एतां शिवबलोपेतां रक्षां य: सुकृती पठेत् ।
स भुक्त्वा सकलान् कामान् शिवसायुज्यमाप्नुयात् ।।१०।।

ग्रहभूतपिशाचाद्यास्त्रैलोक्ये विचरन्ति ये ।
दूरादाशु पलायन्ते शिवनामाभिरक्षणात् ।।१०।।

अभयंकरनामेदं कवचं पार्वतीपते: ।
भक्त्या बिभर्ति य: कण्ठे तस्य वश्यं जगत्त्रयम् ।।११।।

इमां नारायण: स्वप्ने शिवरक्षां यथाऽऽदिशत् ।
प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यस्तथाऽलिखत् ।।१२।।

।।इति श्रीयाज्ञवल्क्यप्रोक्तं शिवरक्षास्तोत्रमं सम्पूर्णम्।।

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
॥ श्री स्वामी समर्थापर्ण मस्तु॥